# संस्कृत-वार्ता:

**दिनाङ्क :-16.06.2024**

**प्रात: - 06:55**

## अथ वार्ता:

### कृषि-शिवराज:

केन्द्रीय-कृषिमन्त्री शिवराजसिंहचौहान: प्रोदीरितवान् यत् प्रधानमन्त्री नरेन्द्रमोदी जूनमासस्य अष्टादश दिनांके कृषक-सम्मान-निधि-योजनाया: अन्तर्गतं त्रिलक्षाधिक-नवकोटि-कृषकाणां वित्तकोषे भूयोऽपि विंशति सहस्रकोटिरूप्यकाणि हस्तान्तरितं करिष्यति। नवदिल्ल्यां श्रीचौहान: अकथयत् यत् व्यतीतेषु दशसु वर्षेषु साम्प्रतं यावत् एकादशकोटि-कृषकाणां वित्तकोषेषु त्रि-लक्ष-कोटि-रूप्यकाणि सम्प्रेषितानि। असौ जूनमासस्य अष्टादशदिनांके प्रधानमन्त्रिण: कार्यक्रमेऽस्मिन् सम्मिलितुं सर्वान् मुख्यमन्त्रिण: पत्रं लिखितवान्। सः प्रकाशितवान् यत् ग्रामीणविकासः कृषिः तथा कृषककल्याणमन्त्रीरूपेण प्रभारं स्वीकृत्य मन्त्रालयस्य अधिकारिभिः सह चर्चां कृत्वा कृषकाणां कल्याणसम्बद्धेषु प्रत्येकस्मिन् महत्त्वपूर्णेषु विषयेषु कार्यं कुर्वन् अस्ति। चौहानमहोदयः अवदत् यत् सः नूतनसर्वकारस्य शतदिवसीययोजनायाः अन्तर्गतं स्वमन्त्रालयस्य कार्ययोजनायाः अपि समीक्षां कृतवान्।

### शाह-उपवेशनम्

जम्मू-कश्मीरस्य सुरक्षास्थितेः, अमरनाथयात्रायाः सज्जतायाः च समीक्षां कर्तुं अद्य केन्द्रीयगृहमन्त्री अमितशाहस्य अध्यक्षतायां उच्चस्तरीयसभायाः आयोजनं भविष्यति। उपवेशने जम्मू कश्मीरस्य उपराज्यपाल मनोजसिन्हा, राष्ट्रीय सुरक्षा परामर्शदः अजीत डोभालः, केंद्रीय गृह सचिवः, सैन्य, आरक्षी, जम्मू-कश्मीर प्रशासनस्य वरिष्ठ अधिकारिणः च उपस्थिताः भविष्यन्ति। परह्यः नवदिल्ल्यां गृहमन्त्रालयस्य वरिष्ठाधिकारिभिः सह उपवेशने शाहमहोदयेन जम्मू-कश्मीरस्य सुरक्षास्थितेः समीक्षा कृता आसीत्।

### उत्तराखण्ड

ह्य: उत्तराखण्डे एकस्यां घटनायां चतुर्दश यात्रिण: मृता:। रूद्रप्रयाग-जनपदे बद्रीनाथ-राष्ट्रीय राजमार्गे रैंतौल्या: समीपे यात्रिवाहनं खात्यां पतितवत्। अनेन कारणेन त्रयोदशजना: मृता:। सप्तयात्रिण: ये गम्भीररूपेण आहता: तेषां उपचार: ऋषिकेश स्थिते एम्स चिकित्सालये प्रचलति। सूचनानुसारेण वाहने षड्विंशति: श्रद्धालव: आरूढा: आसन्। सूचनां प्राप्य तत्क्षणम् जनपददण्डाधिकारी, आरक्षी अधीक्षकेन एसडीआरएफ, अग्निशामकसेवाः, मण्डल आपदाप्रबन्धनदलानि च समेत्य उद्धारकार्यक्रमः कृतवन्तः। सर्वाणि शवानि प्राप्तानि। राष्ट्रपति द्रौपदी मुर्मू, उपराष्ट्रपति जगदीप धनखड़ः, प्रधानमंत्री नरेन्द्र मोदी, केन्द्रीय गृहमंत्री अमित शाह:, उत्तराखंडस्य राज्यपाल: गुरमीत सिंह:, मुख्यमंत्री पुष्कर सिंह धामी च घटनां प्रति दुःखं प्रकटितवन्तः। प्रधानमन्त्री मोदी प्रत्येकस्य मृतकस्य परिजनानां कृते प्रधानमन्त्री राष्ट्रियउद्धारकोषात् द्वीलक्षं अपी च व्रणितानाम् कृते पञ्चाशत् सहस्र रुप्यकाणां अनुग्रहरशेः घोषणां कृतवान्।

### छत्तीसगढ-उग्रवादी

छत्तीसगढस्य बस्तरे सुरक्षाबलैः सह सङ्घर्षे अष्टौ उग्रवादिनः मृताः। ह्य: छत्तीसगढस्य बस्तरसंभागे सुरक्षाबलैः सह सङ्घर्षे अष्टौ उग्रवादिनः मृताः। तत्रैव द्वौ सुरक्षाकर्मिणौ अपि आहतौ इति सूचनास्ति। बस्तरसम्भागस्य अबूझमाडक्षेत्रे उग्रवादिनाम् उपस्थितेः विषये सूचनाधारेण भारत-तिब्बत-सीम-आरक्षिबलेन, जनपद-आरक्षि-बलेन विशेषकार्यबलेन च संयुक्तरूपेण अन्वेषणाभियानम् आरब्धम् आसीत्।

**टी-20 क्रिकेट विश्व कप**

आई.सी.सी. इत्यस्यां पुरूषाणां विंशति प्रति विंशति-विश्व-चषक-क्रिकेट्-प्रतिस्पर्धायां गतरात्रौ इंग्लैंडदलेन नामीबियादलं डकवर्थ-लुईस-स्टर्न (डीएलएस) पद्धत्या सरविवियन-रिचर्ड्स क्रीडांगणे एकचत्वारिंशत् धावनांकैः पराजितम्।

**।।इति वार्ता:।।**